# संस्कृतबालादर्शे एकोनविंशः पाठः ॥ १९ ॥

## पुष्पगुच्छः

**भृङ्गः।          मकरन्दः।          अलम्।**

अत्र एकः पुष्पगुच्छो वर्तते। अयं रमणीयः पुष्पगुच्छः। अयं रूपेण नेत्रं गन्धेन घ्राणं च आनन्दयति। पश्य ! तस्मिन् एको भृङ्गः तिष्ठति। सः पुष्पेभ्यः मकरन्दं पिबति। तस्मात् बृङ्गस्य मधुपः इत्यपि नाम ॥

भृङ्गाः मकरन्दं पिबन्तः मधुरं गुञ्जन्ति। ते पुष्पात् पुष्पं चलन्तः विहरन्ति। भृङ्गाणां वर्णः नीलः। तेषां भासुरौ द्वौ पक्षौ विद्येते। तेषां मुखे श्मश्रुणः स्थाने रेफतुल्ये द्वौ रोमणी स्तः। अतः ते पश्यतां जनानां विनोदं आवहन्ति ॥

भृङ्गाणां समीपं मा गच्छ। ते त्वां दशेयुः। अलं तव कुतूहलेन। आगच्छ, गृहं गच्छावः ॥

– – – –

इत्यादि = etc., पिबन् *(sing.)*, पिबन्तः *(pl.)*, = drinking, चलन् (*sing.*), चलन्तः *(pl.)* = going, विहरन्ति = play (*pl*), भासुरौ = shining, विद्येते = are (*dual*), विद्यन्ते = are (*pl*), स्मश्रु *n sing.*, श्मश्रुणः = mustache(s) (*pl*), रोमन् , रोम *(sing.)*, रोमणी (*dual*), रोमाणि (*pl.*) = hair, पश्यतां = see (*dual*), दशेयुः = may bite. कुतूहलं = curiosity, कुतूहलेन = with curiosity,

**प्रश्नाः** (उत्तराः)

१। अयं कीदृशः पुष्पगुच्छः ?

अयं पुष्पगुच्छः रमणीयः।

२। अयं केन किम् आनन्दयति ?

अयं पुष्पगुच्छः रमणीयः दृश्यते , रूपेण नेत्रं , गन्धेन घ्राणंच आनन्दयति।

३। भृङ्गः किं करोति ?

भृङ्गः पुष्पेभ्यः मकरन्दं पिभति।

४। के किं कुर्वन्तः मधुरं गुञ्जन्ति ?

भृङ्गाः मकरन्दं पिबन्तः मधुरं गुञ्जन्ति।

५। ते कथं विहरन्ति ?

ते भृङ्गाः पुष्पात् पुष्पं चलन्तः विहरन्ति।

६। भृङ्गाणां वर्णः कीदृशः ?

भृगाणां वर्णः नीलः। भृगाणां वर्णः नीलः दृश्यते।

७। तेषां कीदृशौ द्वौ पक्षौ विद्येते ?

तेषां भासुरौ पक्षौ विद्येते।

८। तेषां मुखे कस्य स्थाने के स्तः ?

तेषां मुखे श्मश्रुणः स्थाने रेफतुल्ये द्वे रोमणी स्तः।

९। के केषां विनोदमावहन्ति ?

ते भृङ्गाः जनानां विनोदम् आवह्वन्ति।

१०। भृङ्गाणां समीपं गतान् अस्मान् किं ते कुर्युः ?

भृङ्गाणां समीपं गतान् ते त्वं दशेयुः।

ख) Fill up the blanks using the forms of 'त्रि' and 'चतुर'।

१। सत्वं रजः तमः इति ____ गुणाः सन्ति।

सत्वं रजः तमः इति त्रयः गुणाः सन्ति।

२। दशरथस्य ____ भार्याः आसन्।

दशरथस्य तिस्रः भार्याः आसन्।

३। शिवस्य ____ नेत्राणि वर्तन्ते।

शिवस्य त्रीणि नेत्राणि वर्तन्ते।

४। मृगाणां ____ चरणाः विद्यन्ते।

मृगाणां चत्वारः चरणाः विद्यन्ते।

**ग)** अस्मिन् पाठे शतृ प्रत्ययान्ताः (Present participles) के ?

पिबति - (पिबन् - पिबन्तौ पिबन्तः)।

चलति - (चलन् - चलन्तौ - चलन्तः)।

**घ) पर्यायपदम् -** - भृङ्गः , षट्पदः , मधुकरः , भ्रमरः , द्विरेफ , मधुपः

शब्दसंग्रहः śabdasaṅgrahaḥ = Vocabulary

| | |
|---|---|
| पुष्पगुच्छः *m* bunch of flowers | विहरन्ति ***P.*** they play |
| भृङ्गः ***m*** bee | भास्वरः ***a.m.*** shining |
| मकरन्द honey of flowers | पक्षः ***m*** wing |
| अलं ***in.*** enough of | श्मश्रु ***n*** mustache |
| रमणीयः ***a.m.*** beautiful | रेफः ***m*** letter ' र ' |
| रूपं ***rn.*** appearance | विनोदः ***m*** pleasure |
| गन्धः ***m*** smell | आवहन्ति *P.* create, give |
| घ्राणः ***m*** nose | दशेयुः *P.* may bite |
| गुञ्जन्ति ***P.*** they hum | कुतूहलम् ***a.*** curiosity |